## पत्रिका– ४

### संस्कृतवाक्यान्यङ्ग्रेजीभाषया विद्यार्थिनो विपरिणमयेयुः ।

१) सीतां रामः परिणिनाय ।

२) अविवेकः परमापदां पदम् ।

३) वर्षासु शाकटिकः शकटं नगरान्तरमनयत् ।

४) भो वत्से मनीषिता गृहेषु सन्ति ।

५) लभेत सिकतासु तैलमपि यत्नतः ।

६) मगधदेशे पाटलिपुत्रं नाम नगरम् ।

७) कुक्कुरः व्याघ्रः कृतः ।

८) अमुं नारद इति जानाति ।

९) काममपि गणिकामवरोधमकरोत् ।

१०) वङ्गानां राजा सङ्ख्ये प्राणान् विजहौ (असुभिर्वियुक्तः) ।

११) यूयं रामोऽहं च दण्डकारण्ये सुखेन कालमयापयाम ।

१२) स नर इमे बाला वैतत्फलं गृह्णन्तु ।

१३) हरिरहं च यूयं कृष्णश्च वैतत्कार्यं कर्तुं शक्नुथ । न गोपालस्तस्य कनीयांसो भ्रातरो वा कर्तुं शक्नुयुः ।

१४) यूयं कृष्णश्च तत्कार्यं समापयितुं किं न यतध्वे ।

१५) भीष्मद्रोणकृपकर्णास्त्वं बलवान् भोजः शकुनिर्द्रौणिरहं च भो राजंस्तव सैन्यं भवामः ।

१६) तस्मिन् अश्वात् पतति सति रामो गोपाल आवां च तत्र संन्निहिता आस्म ।

१७) युवां पुष्पमित्रस्य त्रयो भृत्या अन्यौ द्वौ नरौ च राजसभां गच्छेत ।

१८) पाटलीपुत्राधिपः तस्य राज्ञी चोभावप्युदारौ स्तः ।

१९) शैत्यं हि यत् सा प्रकृतिर्जलस्य ।

२०) यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टम् ।

२१) न चागच्छता किन्नरमिथुने बद्धदृष्टिना मया महावनेऽस्मिन् पन्था निरूपितः, येन प्रतिनिवृत्य यास्यामि ।

२२) न चास्मिन् प्रदेशे परिभ्रमता मया मर्त्यः कश्चिदासाद्यते, यः सुवर्णपुरगामिनं पन्थानमुपदेक्ष्यति ।

२३) विदितसङ्क्षेपा हि प्रपञ्चं जिज्ञासवो भवन्ति ।

२४) भर्तुः प्रणाशात् शोचनीयं दशान्तरं प्रपन्ने जनन्यावपश्यत् ।

२५) अश्वत्थामा किं न यातः स्मृतिं ते।

२६) कादम्बरी परां कोटिमानन्दस्याध्यगच्छत्।

२७) न तृप्तिमायाति। अखिलां रात्रिं कटमधिशिश्ये।

२८) नरपतिहितकर्ता द्वेष्यतां याति लोके।

२९) प्रभुचित्तमेव हि जनोऽनुवर्त्तते।

३०) परिजनो राजानमभितः स्थितः।

३१) कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम्।

३२) अवन्तीं परितः क्रोशौ सर्वत्र रमणीयान्युद्यानानि दृश्यन्ते।

३३) रामः कतिचिद्दिनानि चित्रकूटपर्वतमध्यवसत्।

३४) जपमनु प्रावर्षत्।

३५) रामं ग्रामं गमयति।

३६) वृक्षमवचिनोति फलानि।

३७) अहं तं दश प्रश्नानपृच्छम्।

३८) अजां ग्रामं नयति।

३९) स पुत्रस्य विवाहार्थं भृत्यैर्महान्तं मण्डपमकारयत्।

४०) भर्तुराज्ञां मूर्ध्ना वहति।

४१) जीवितेनैव शपामि ते।

४२) कतमेन दिग्भागेन गतः स जाल्मः।

४३) स्वरेण रामभद्रमनुहरति।

४४) धनदेन समस्त्यागे।

४५) अस्य मुखं सीताया मुखचन्द्रेण संवदति।

४६) द्वादशवर्षैर्व्याकरणं श्रूयते।

४७) जटाभिस्तापसः।

४८) अलमतिपल्लवितेन।

४९) देवपादानां सेवकैर्न प्रयोजनम्।

५०) त्रिलोचनाय प्रणम्य गच्छति।